चैयगेन दग्धद्वयं तप्ताङ्गारोपरि रक्षेत्। इति पाकराजेश्वरः ॥ * ॥ अत्र मांसस्थाने मत्स्यप्रभृत्यादिकं गन्धद्रव्येण सह दधियोगः घृतपरिमाणस्याधिक्यञ्च भवितुमर्हति ॥

पलापः, पुं, ( पलं मांसं आप्यते प्राप्यते बाहुल्येन अत्र। पल+आप्+घञ्।) कण्ठप्रदेशः। हस्तिकपोलः। इति शब्दमाला ॥

पलायनं, क्ली, ( पलाय्यते इति। पलाय+भावे ल्युट्।) भयादिना स्थानान्तरगमनम्। पालान इति पौठ देश्यौन इति च भाषा ॥ ( यथा, रघुः ।१९।३१।

"मित्र कृत्यमपदिश्य पार्थिवः
प्रस्थितं तमनवस्थितं प्रियाः।
विद्म हे शठ ! पलायनच्छला-
न्यञ्जसेति रुरुधुः कचग्रहैः ॥")

तत्पर्य्यायः। अपयानम् २ संदावः ३ द्रवः ४ विद्रवः ५ उपक्रमः ६ संद्रावः ७ उद्द्रावः ८ प्रद्रावः ९। इति हेमचन्द्रः। ३। ४६६॥ निद्रावः १० उद्द्रवः ११ सम्पायः १२ द्रावः १३ प्रणालिका १४ अपक्रमः १५ संक्रमः १६। इति शब्दरत्नावली ॥

पलायितः, त्रि, (पलाय+क्त।) पलायनविशिष्टः। तत्पर्य्यायः। नष्टः २ गृहीतदिक् ३ तिरोहितः ४। इति हेमचन्द्रः॥

पलालः, पुं क्ली, ( पलति शस्यशून्यत्वं प्राप्नोतीति। पल+"तमिविशिविडीति।" उणां १।११७। इति कालन्। यद्वा, पलं अलतीति। अल+"कर्म्मण्यण्।" ३।२।१। इति अण्।) निष्फलकाण्डः। शस्यशून्यधान्यनालः। इत्यमरः।२।९।२२॥ पोयाल इति भाषा॥ (यथा, मनुः।५।१२२।

"प्रोक्षणात् तृणकाष्ठञ्च पलालश्चैव शुध्यति॥"

क्ली, स्कन्दस्य मातृविशेषः। यथा, महाभारते।३।१२७।१०।

"काकी च हलिमा चैव मालिनी बृंहिता तथा। आर्य्या पलाला वैमित्रा सप्तैताः शिशुमातरः॥")

पलालदोहदः, पुं, ( पलालं दोहदं यस्य।) आम्रवृक्षः। इति शब्दमाला ॥

पलाशं, क्ली, ( पलं गतिं कम्पनमित्यर्थः। अश्नुते व्याप्नोतीति। पल+अश+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) पत्रम्। इत्यमरः। २।४।१४॥ (यथा, महाभारते।३।३५।२५।

"इहच्छाल इवानूपे शाखापुष्पपलाशवान्॥"

पलाशस्य पलाशवृक्षस्य इदम्। पलाशपुष्पादि। यथा कुमारे। ३। २९।

"बालेन्दुवक्राण्यविकाशभावात्
बभुः पलाशान्यतिलोहितानि।
सद्यो वसन्तेन समागतानां
नखक्षतानीव वनस्थलीनाम्॥")

पलाशः, पुं, (पलाशानि पर्णानि सन्त्यस्य। "अर्श आदिभ्योऽच्।" ५।२।१२७। इत्यच्।) स्वनामख्यातवृक्षः। स तु ब्रह्मणः स्वरूपः। यथा,—

सूत उवाच।

"अश्वत्थरूपी भगवान् विष्णुरेव न संशयः।
रुद्ररूपी वटस्तद्वत् पलाशो ब्रह्मरूपधृक् ॥
दर्शनस्पर्शसेवासु ते वै पापहराः स्मृताः।
दुःखापद्व्याधिदुष्टानां विनाशकारिणो ध्रुवम् ॥

ऋषय ऊचुः।

कथं वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः।
एतत् कथय सर्व्वज्ञ! संशयोऽत्र महान् हि नः॥

सूत उवाच।

पार्व्वतीशिवयोर्द्देवैः सुरतं कुर्व्वतोः किल।
अग्निं ब्राह्मणवेशेन प्रेष्य विघ्नं कृतं पुरा ॥
ततस्तु पार्व्वती क्रुद्धा शशाप त्रिदिवौकसः।
रेतःसेकसुखभ्रंशकम्पमाना तदा रुषा॥

पार्व्वत्युवाच।

क्रिमिकीटादयोऽप्येते जानन्ति सुरतेः सुखम्।
तस्मान्मम सुखभ्रंशाद्यूयं वृक्षत्वमाप्स्यथ॥

सूत उवाच।

एवं सा पार्व्वती देवी अशपत् क्रुद्धमानसा।
तस्माद्वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः॥"

इति पाद्मोत्तरखण्डे १६० अध्यायः॥

तत्पर्य्यायः। किंशुकः २ पर्णः ३ वातपोथः ४। इत्यमरः।२।४।२९॥ याज्ञिकः ५ त्रिपर्णः ६ रक्तपुष्पः ७ पूतद्रुः ८ ब्रह्मवृक्षकः ९ ब्रह्मोपनेता १० काष्ठद्रुः ११। अस्य गुणाः। कषायत्वम्। उष्णत्वम्। क्रिमिदोषविनाशित्वञ्च॥ तद्बीजगुणाः। पामकण्डूतिदद्रुत्वग्दोषनाशित्वम्॥ तत्पुष्पगुणाः। उष्णत्वम्। कण्डूकुष्ठनाशित्वञ्च॥ तत्पुष्पं चतुर्विधं यथा, राजनिर्घण्टे।

"रक्तः पीतः सितो नीलः कुसुमैस्तु विभाव्यते। किंशुकैर्गुणसाम्योऽपि सितो विज्ञानदः स्मृतः॥"

"पलाशः किंशुकः पर्णो याज्ञिको रक्तपुष्पकः।
क्षारश्रेष्ठो वातपोथो ब्रह्मवृक्षः समिद्वरः॥
पलाशो दीपनो वृष्यः सरोष्णो व्रणगुल्मजित्।
कषायः कटुकस्तिक्तः स्निग्धो गुदजरोगजित्॥
भग्नसन्धानकृद्दोषग्रहण्यर्शःक्रिमीन् हरेत्।
तत्पुष्पं स्वादु पाके तु कटु तिक्तं कषायकम्॥
वातलं कफपित्तास्रकृच्छ्रजिद्ग्राहि शीतलम्।
तृड्दाहशमनं वातरक्तकुष्ठहरं परम्॥
फलं लघूष्णं मेहार्शःक्रिमिवातकफापहम्।
विपाके कटुकं रूक्षं कुष्ठगुल्मोदरप्रणुत्॥"

इति भावप्रकाशः॥

पलाशभेदा। यथा,—

"तद्भेदे स्यात् किंशुलुकः किम्बलो हस्तिकर्णकः॥"

इति शब्दरत्नावली॥

( पलाशस्य फलपुष्पादौ क्ली॥) शटी। ( पलं मांसं अश्नातीति। पल+अश+अण्। यद्वा, पले मांसे आशा यस्य।) राक्षसः। इति मेदिनी। शे, २४॥ हरितः। मगधदेशः। इति शब्दरत्नावली॥

पलाशः, त्रि, ( पलवद्धरिद्वर्णेन अश्यते व्याप्यते इति। अश+घञ्।) हरिद्वर्णविशिष्टः। इति मेदिनी। शे, २४॥ निर्दयः। इति धरणिः॥

पलाशकः, पुं, ( पलाश+संज्ञायां कन्।) शटी। इति जटाधरः॥ पलाशवृक्षः। इति शब्दरत्नावली॥

पलाशपर्णी, स्त्री, (पलाशस्य पर्णमिव पर्णमस्याः। गौरादित्वात् ङीष्।) अश्वगन्धा। इति राजनिर्घण्टः॥

पलाशाख्यः, पुं, (पलाशस्य आख्या आख्या यस्य। यद्वा, पलाशं पलाशगन्धमाख्यातीति। आ+ख्या+कः।) नाडीहिङ्गु। इति राजनिर्घण्टः॥

पलाशान्ता, स्त्री, ( पलाशं अन्ते यस्याः। यद्वा, पलाशानां पत्राणां अन्तो गन्धवान् यस्याः।) गन्धपत्रा। इति राजनिर्घण्टः॥

पलाशी, [ न् ] पुं, (पलाशं विद्यतेऽस्य। पलाश+इनिः।) वृक्षः। इत्यमरः। २।४।५॥ ( पलं मांसं अश्नातीति। अश+णिनिः।) राक्षसः। इति मेदिनी। ने, १६३॥ क्षीरिवृक्षः। इति रत्नमाला॥ ( पत्रविशिष्टे वाच्यलिङ्गः। यथा,—

"ततः स भगवान् विद्वान् काश्यपो द्विजसत्तमः। भस्मराशीकृतं वृक्षं विद्यया समजीवत्॥
अङ्कुरं कृतवांस्तत्र ततः पर्णद्वयान्वितम्। पलाशिनं शाखिनञ्च तथा विटपिनं पुनः॥"

इति महाभारते।१।४३।९—१०॥

स्त्री, नदीविशेषः। इयन्तु शुक्तिमत्पर्व्वतसम्भूता। यथा, मार्कण्डेये।५७।३०।

"कृपा पलाशिनी चैव शुक्तिमत्प्रभवा स्मृता॥")

पलाशी, स्त्री, ( पलाश+गौरादित्वात् ङीष्।) लाक्षा। लताविशेषः। तत्पर्य्यायः। पत्रवल्ली २ पर्णवल्ली ३ पलाशिका ४ सुरपर्णी ५ सुपर्णी ६ दीर्घवल्ली ७ विषादनी ८ अम्लपत्री ९ दीर्घपत्री १० रसाम्ला ११ अम्लिका १२ अम्लातकी १३ काञ्जिका १४। अस्या गुणाः। मधुरत्वम्। अम्लत्वम्। मुखदोषारोचकनाशित्वम्। पथ्यत्वम्। पित्तकोपकारित्वञ्च। इति राजनिर्घण्टः॥

पलिक्नी, स्त्री, ( पलितमस्या अस्तीति। "अर्श आदिभ्योऽच्।" इत्यच्। "असितपलितयोर्न।" वार्त्तिं। "छन्दसि क्नमेके।" इत्येकोक्तेर्भाषायामपि तस्य क्न इत्यादेशो भवति। ततो नान्तत्वात् ङीप्।) वृद्धा। इत्यमरः। २। ६। १२॥ बालगर्भिणी गौः। इति हेमचन्द्रः॥

पलिघः, पुं, ( परिहन्यतेऽनेनेति। परि+हन+"परौ घः।" ८।२।२२। इति अप् घादेशश्च। ततः "परेश्च घाङ्कयोः।" ८।२।२२। इति रस्य लः।) काचकलसः। घटः। प्राकारः। गोपुरम्। इति मेदिनी। घे, ६॥

पलितं, क्ली, ( पलि+भावे क्तः। यद्वा, फलनमिति। फल+"फलेरितजादेश्च पः।" उणां। ५। ३४। इति इतच् फस्य पत्वम्।) जरसा केशादौ शौक्ल्यम्। केशपाकः। इत्यमरः। २। ६। ४१॥ ( यथा, मनुः। ६। २।

"गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः। अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत्॥")